# শ্রীনৃসিংহমঙ্গলম্

{॥ শ্রীনৃসিংহমঙ্গলম্ ॥}

ঘটিকাচল শৃঙ্গাগ্র বিমানোদর বাসিনে ।

নিখিলামর সেব্যায নরসিংহায মঙ্গলম্ ॥ ১॥

উদীচীরঙ্গ-নিবসৎসুমনস্তোম সূক্তিভিঃ ।

নিত্যাভিবৃদ্ধ যশসে নরসিংহায মঙ্গলম্ ॥ ২॥

সুধাবল্লী-পরিষ্বঙ্গ-সুরভীকৃত-বক্ষসে ।

ঘটিকাদ্রি-নিবাসায শ্রীনৃসিংহায মঙ্গলম্ ॥ ৩॥

সর্বারিষ্ট-বিনাশায সর্বেষ্ট-ফলদাযিনে ।

ঘটিকাদ্রি-নিবাসায শ্রীনৃসিংহায মঙ্গলম্ ॥ ৪॥

মহাগুরু মনঃপদ্ম মধ্য নিত্য নিবাসিনে ।

ভক্তোচিতায ভবতাত্ মঙ্গলং শাশ্বতী সমাঃ ॥ ৫॥

শ্রীমত্যৈ বিষ্ণুচিত্তার্যমনোনন্দন হেতবে ।

নন্দনন্দন-সুন্দর্যৈ গোদাযৈ নিত্যমঙ্গলম্ ॥ ৬॥

শ্রীমন্মহাভূতপুরে শ্রীমৎকেশব-যজ্বনঃ ।

কান্তিমত্যাং প্রসূতায যতিরাজায মঙ্গলম্ ॥ ৭॥

পাদুকে যতিরাজস্য কথযন্তি যদাখ্যযা।

তস্য দাশরথেঃ পাদৌ শিরসা ধারযাম্যহম্ ॥ ৮॥

শ্রীমতে রম্যজামাতৃ-মুনীন্দ্রায মহাত্মনে ।

শ্রীরঙ্গবাসিনে ভূযাত্ নিত্যশ্রীঃ নিত্যমঙ্গলম্ ॥ ৯॥

সৌম্যজামাতৃ-যোগীন্দ্র চরণাম্বুজ-ষট্পদম্ ।

দেবরাজগুরুং বন্দে দিব্যজ্ঞানপ্রদং শুভম্ ॥ ১০॥

বাধূল-শ্রীনিবাসার্য-তনযং বিনযাধিকম্ ।

প্রজ্ঞানিধিং প্রপদ্যেঽহং শ্রীনিবাসমহাগুরুম্ ॥ ১১॥

চণ্ডমারুত-বেদান্তবিজযাদি-স্বসূক্তিভিঃ ।

বেদান্ত-রক্ষকাযাস্তু মহাচার্যায মঙ্গলম্ ॥ ১২॥

Encoded and proofread N.Balasubramanian bbalu@sify.com

Please send corrections to sanskrit@cheerful.com

Narasimha Mangalam Lyrics in Bengali PDF
% File name : nrisimhamangalam.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Latest update : June 25, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website